# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - IV**

**Time : 3 Hours** **(Pages 12)** **Marks : 100**

## प्रथमः विभागः - सुगमसंस्कृतम् ।

**प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** ४

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ |  | २ |  | ३ |  | ४ |  | ५ |   |
| | | | | | | | | | |

**प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २)** २

१. सप्तसप्ततिः -
२. ६ -
३. ९२ -

**प्र.१ इ) स्तम्भमेलनं कुरुत ।** २

| | अ | ब |
|---|---|---|
| १. | सार्ध-एकादशवादनम् | ३:४५ |
| २. | पादोन-चतुर्वादनम् | १:०५ |
| ३. | पञ्चाधिक-एकवादनम् | ८:१५ |
| ४. | सपाद-अष्टवादनम् | ११:३० |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

ह्यः ________ ← अद्य सोमवासरः → ________ मङ्गलवासरः → परश्वः ________

**प्र.१ उ) उदाहरणद्वयं लिखत । (६ तः ५)** ५

१. अनुनासिके -

२. दीर्घस्वरौ -

३. इकारान्तस्य -

४. नपुंसकलिङ्गस्य -

५. प्रथमगणस्य धातू -

६. दशमगणस्य धातू -

## द्वितीयः विभागः - गद्यम् ।

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

मम वाक्यसमाप्तेः पूर्वमेव व्याघ्रस्य मनुष्यवाण्या भाषणेन मूर्च्छिता सा महिला 'भूतोऽयं भूत' ... इति उच्चैः आक्रोशन्ती भूमौ पतिता । मम पुत्रः राघुः अपि एकवारं पञ्जरसमीपम् आगत्य, ''आप्पा ! चायं पातुम् इच्छति किम् ?'' इति यदा पृष्टवान् तदा प्रेक्षकाः सम्भ्रान्ताः एव ।

रात्रौ दशवादने सर्कसक्रीडायाः प्रारम्भः जातः । द्वादशवादने क्रीडायाः चरमबिन्दुः समायातः-सहभोजनम् । प्रेक्षकाणाम् उत्कण्ठायाः पराकाष्ठा जाता । सेवकः मञ्चे त्रीणि आसनानि स्थापितवान् मध्यभागे च वर्तुलाकारं पीठम् । अहम् एकस्मिन् आसने उपावेशितः। अत्रान्तरे भल्लूकवेषधारी अब्दुलः तत्र प्राप्तः । गौः अपि मञ्चं समागता । ततः अस्माकं पुरतः खाद्यस्य योजना कृता । सहभोजनस्य प्रारम्भे जाते उत्तेजितैः प्रेक्षकैः आनन्देन तालिकावादनम् आरब्धम् । पूर्वमपि व्याघ्रभल्लूकौ मानुषौ एव । तथापि सा धेनुः ताभ्यां सह कार्यक्रमं कर्तुम् अभ्यस्ता आसीत् ।

**१. अवबोधनम् । (४ तः ३)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

महिला मूर्च्छिता यतः .......

(अ) महिला ज्वरपीडिता ।

(ब) तस्याः पुरतः व्याघ्रः मनुष्यवाण्या अवदत् ।

**ख) कः कं वदति ।** १

'चायं पातुम् इच्छति किम् ?'

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

सर्कसक्रीडायाः प्रारम्भः कदा जातः ?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत ।** १

अब्दुलः मञ्चे त्रीणि आसनानि स्थापितवान् ।

**२. शब्दज्ञानम् । (३ तः २)**

**क) गद्यांशतः तुमन्त-अव्यये चित्वा लिखत ।** १

**ख) प्रश्ननिर्माणं कुरुत ।** १

गौः मञ्चं समागता ।

**ग) सन्धिविग्रहं कुरुत ।** १

भूतोऽयम् -....... + ....... ।

**३. पृथक्करणम् ।** २

**क्रमेण योजयत ।**

(i) भल्लूकवेषधारिणः अब्दुलस्य आगमनम् ।

(ii) सर्कसक्रीडायाः प्रारम्भः ।

(iii) उत्तेजितैः प्रेक्षकैः तालिकावादनम् ।

(iv) पशूनां खाद्यस्य योजना ।

**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

| | | |
|---|---|---|
| महोदयः | - | अपि भवती संस्कृतं पाठयति ? |
| महोदया | - | (सस्मितं) न खलु । |
| महोदयः | - | भवत्याः समीपे एतं सुभाषितसङ्ग्रहं दृष्ट्वा मया एवं चिन्तितम् । |
| महोदया | - | ओह् ! यद्यपि संस्कृतं न पाठयामि तथापि अस्य पुस्तकस्य मम कार्यक्षेत्रेण सह सम्बन्धः अस्ति । |
| महोदयः | - | एवम् । कस्मिन् क्षेत्रे कार्यरता भवती ? |
| महोदया | - | अहं व्यवस्थापनप्रशिक्षिकारूपेण कार्यं करोमि । मया अवगतं यद् रामायण-महाभारत-किरातार्जुनीय-रघुवंश- इत्यादिषु बहवः श्लोकाः सन्ति येषु व्यवस्थापनशास्त्रस्य मूलतत्त्वानि दृष्टान्तसहितानि निर्दिष्टानि । अनेन काव्यमाध्यमेन विषयप्रवेशः सुगमः भवति । एषा पद्धतिः मया स्वीकृता जनैरपि अभिमता । अतः मया पुनरेकवारं संस्कृतभाषायाः संस्कृतकाव्यादीनां च अध्ययनं प्रारब्धम् । |
| महोदयः | - | अहो आश्चर्यम् ! शालायाः अनन्तरं खण्डितं मम संस्कृताध्ययनम् । तदपि अधुनैव पुनः आरब्धम् । |
| महोदया | - | कथं कथम् ? |

| | |
|---|---|
| महोदयः - | वस्तुतः अहं वाणिज्यशाखायाः स्नातकः । विधिशाखायाः पदवी अपि प्राप्ता मया । साम्प्रतं बहुराष्ट्रियसंस्थायां विधिविमर्शकरूपेण कार्यं करोमि। तदनुसृत्य कौटिलीयम् अर्थशास्त्रं, याज्ञवल्क्यस्मृतिः आदीनां ग्रन्थानाम् अध्ययनं साहाय्यकरं भवेत् इति गुरुभिः उक्तम् । अतः अधुना अहं शास्त्रविषयकाणां संस्कृतग्रन्थानाम् अध्ययने यत्नं करोमि । (स्यूतात् किमपि संस्कृतपुस्तकं दर्शयति।) |

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

(१) ........... समीपे सुभाषितसङ्ग्रहं दृष्ट्वा मया चिन्तितम् । (भवत्यै / भवत्याः)

(२) ......... अवगतम् । (मया / अहम्)

**ख) पूर्णवाक्येन उत्तरत ।** १

केन माध्यमेन विषयप्रवेशः सुगमः भवति ?

**ग) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

महोदयः विधिविमर्शकरूपेण कार्यं करोति ।

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

**२. शब्दज्ञानम् । (३ तः २)**

**क) चतुर्थपदं लिखत ।** १

(१) बहवः : श्लोकाः :: शास्त्रविषयकान् : __________

(२) एका : महिला :: सुगमः : __________

**ख) सन्धिविग्रहं कुरुत ।** १

अधुनैव - ....... + ....... ।

**ग) लकारं लिखत ।** १

ग्रन्थानाम् अध्ययनं साहाय्यकरं <u>भवेत्</u> ।

३. जालरेखाचित्रं पूरयत । २




**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१. (रङ्गमञ्चे - कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।)

कीर्तनकारः - गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।
ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ गङ्गादशहरापर्वप्रारम्भः । अस्मिन् पर्वणि नदीपूजनं कर्तव्यम् ।

श्रोतृवृन्दः - नदीपूजनम् ? किमर्थं नदीपूजनम् ?

२. कीर्तनकारः - एवं विश्वामित्रः नद्यौ प्रीणयित्वा परतीरं गतवान् । अयि श्रोतारः इत्थं नद्यः मानवाः च परस्परं प्रीणयन्तः संस्कृतिं संवर्धितवन्तः ।
प्रवाहिता तरङ्गिणी संस्कृतिर्विकासिता ।
प्रमुदिताश्च मानवाः सरित्कृपासमुन्नताः ।।
नन्दिताः कृषीवलाः प्रफुल्लिता वसुन्धरा ।
अन्नदाननिर्भरा सस्यशामला धरा ।।
सेतुबन्धरोधितं नियन्त्रितं नदीजलम् ।
जनित्रमत्र चालितं जीवनं प्रकाशितम् ।।

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (३ तः २)** ४

१) सर्कसस्वामी किमर्थं चिमणरावं प्रति आगतः ?
२) शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा ?
३) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम् ?

## तृतीयः विभागः - पद्यम् ।

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवोऽपि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।
वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
तथाप्यादाय वैदेहीं कुशली न गमिष्यसि ।।

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कविः कं 'मित्र' इति सम्बोधयति ?

**ख) मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| बहवः | वचः |
| दीनम् | चातकः |
| | अम्भोदाः |

**ग) रेखाचित्रं पूरयत ।** २




**प्र.३ आ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

भिक्षुः क्वास्ति बलेर्मखे पशुपतिः किं नास्त्यसौ गोकुले
मुग्धे पन्नगभूषणः सखि सदा शेते च तस्योपरि ।
आर्ये मुञ्च विषादमाशु कमले नाहं प्रकृत्या चला
चेत्थं वै गिरिजासमुद्रसुतयोः सम्भाषणं पातु वः ।।
सा गृहीताऽतिचुक्रोश रावणेन यशस्विनी ।
रामेति सीता दुःखार्ता रामे दूरगते वने ।।

**क) पूर्णवाक्येन उत्तरं लिखत ।** १
विष्णुः भिक्षुरूपेण कुत्र गच्छति ?

**ख) सन्धिविग्रहं कुरुत ।** १
रामेति - .............. + .............. ।

**ग) माध्यमभाषया उत्तरं लिखत ।** २
'रामाभिषेके जलमाहरन्त्या....' अस्य श्लोकस्य स्पष्टीकरणं माध्यमभाषया लिखत ।

**प्र.३ इ) पद्ये शुद्धे पूर्णे च लिखत । (क - ख तः १ तथा ग - घ तः १)** ६

१. **क.** अयं ..............वा ॥
**ख.** कं .............. शीतम् ॥
२. **ग.** वैद्यराज .............. च ॥
**घ.** राक्षसेभ्यः .............. पण्डितः ॥

**प्र.३ ई) माध्यमभाषया सरलार्थं लिखत । (४ तः ३)** ६

१. यथैव सकला नद्यः प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ॥
२. एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम् ।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ॥
३. यथा प्रकाशयत्येको भानुर्भुवनमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ॥
४. सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ॥

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र. ४ अ) वाक्यरचनां कुरुत ।**

**क) धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (५ तः ३)** ३

१. याच् →
२. कुप् →
३. रक्ष् →
४. स्निह् →
५. दा-यच्छ् →

**ख) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. <u>धेनुः</u> वास्तविकी एव ।

२. <u>पादपः</u> परोपकाराय फलति ।

३. <u>नरः</u> सर्वदा सत्यं वदेत् ।

४. तडागे <u>पद्मं</u> विकसति ।

**प्र.४ आ) ५ / ७ वाक्यात्मकं निबन्धं अथवा संवादं लिखत । (३ तः१)** ५

१. मम प्रियं पुस्तकम् २. भारतीयं प्रसिद्धं स्थलम् ३. मम प्रिया भाषा

**अथवा**

१. आपणसंवादः २. गृहसंवादः ३. रुग्णालयसंवादः

**प्र.४ इ) निर्दिष्टां कृतीं कुरुत ।**

**मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत ।** ५




(**मञ्जूषा :** उपविशति, चलति, पश्यति, पृच्छति, भर्जयति, विक्रीणाति, विलसति, धारयति)

**अथवा**

**प्र.४ इ) संस्कृतानुवादं कुरुत । (८ तः ५)**

१. Give me eraser.

२. Monkey eats bananas.

३. Lord Ganesha likes shoe-flower.

४. Curtain obstructs the light.

५. Mother rolls the chapati.

६. Shop-keeper takes the money.

७. Gardner collects flowers.

८. Cat searches mouse.

पञ्चमः विभागः - भाषाभ्यासः ।

**प्र.५ अ) तालिकापूर्तिं कुरुत ।**

**१. नामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| रवौ | ............ | ............ | सप्तमी |
| वस्तुना | ............ | ............ | तृतीया |
| ............ | ............ | शशिनः | द्वितीया |

**२. सर्वनामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| मह्यम्-मे | ............ | ............ | चतुर्थी |
| ............ | इमौ | ............ | प्रथमा |
| ............ | ............ | कासाम् | षष्ठी |

**३. क्रियापदतालिका । (६ तः ४)** २

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|---|
| लङ् | ............ | ............ | अजीवन् | प्रथमः पुरुषः |
| लोट् | कुरु | ............ | ............ | मध्यमः पुरुषः |
| लट् | ............ | ............ | मन्यामहे | उत्तमः पुरुषः |

**४. धातुसाधित-विशेषण- तालिका । (६ तः ४)** २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| ज्ञा (९ उ.प.) | ............ | ज्ञातवान् | ............ | जानन्/जानानः |
| कथ् (१० उ.प.) | कथितः | ............ | कथनीयः | ............ |
| लभ् (१ आ. प.) | ............ | लब्धवान् | ............ | लभमानः |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

**१) योग्यपर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३)** ३

१. तेन ............ प्रयोगः कृतः । (त्रयः / त्रिः)

२. ............ भवने योगेशः निवसति । (द्वितीयम् / द्वितीये)

३. ............ वेदाः वर्तन्ते । (चत्वारः / चतुरः)

४. वर्षस्य ............ परीक्षा भवति । (द्विवारं / द्वितीया)

५. श्रीकृष्णः देवक्याः ............ अपत्यम् । (अष्टमः / अष्टमम्)

**२) समासानां तालिकापूर्तिं कुरुत । (५ तः ३)** ३

| | समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|---|
| १. | राजसद्म | ............ | षष्ठी-तत्पुरुषः समासः |
| २. | ............ | शुकाः च सारिकाः च । | इतरेतर-द्वन्द्वः समासः |
| ३. | सविनयम् | ............ | अव्ययीभावः समासः |
| ४. | कल्याणकारी | कल्याणं करोति इति । | ............ |
| ५. | चिन्ताकुलः | ............ | तृतीया-तत्पुरुषः समासः |

**३) समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत । (५ तः ३)** ३

१. मग्नः -
२. निर्धनः ×
३. नदी -
४. पुरतः ×
५. गौः -

**४) सूचनानुसारं कृतीः कुरुत । (५ तः ३)** ३

क. पदवी अपि प्राप्ता मया । (प्रयोगपरिवर्तनं कुरुत ।)
ख. सर्वधर्मान् परित्यज्य मानवतां भज । (पूर्वकालवाचकं निष्कासयत ।)
ग. आचार्यः शिष्यगणेन सह गङ्गास्नानार्थं गच्छति स्म । ('स्म' निष्कासयत ।)
घ. त्वं दीनं वचः मा ब्रूहि । ('त्वं' स्थाने 'भवान्' योजयत ।)
ङ. पत्रक्रीडायां मग्नः आसम् अहम् । (बहुवचने लिखत ।)

**५) वाक्यं शुद्धं कुरुत । (५ तः ३)** ३

१. सूर्यात् अभितः ग्रहाः परिभ्रमन्ति ।
२. अहं पाठशालां गच्छति ।
३. माला निपुणः बालिका अस्ति ।
४. गृहस्य बहिः वृक्षः अस्ति ।
५. सः वाचनालयं गच्छसि ।

## षष्ठः विभागः - अपठितम् ।

**प्र.६ अ) गद्यांशं पठित्वा कृतीः कुरुत ।**

अस्माकं परिचितः एषः आम्रवृक्षः। एषः वृक्षः उन्नतः विस्तीर्णः च अस्ति। न केवलं तस्य पक्वानि फलानि अस्मभ्यं रोचन्ते अपि तु अपक्वानि अपि। वसन्ते ऋतौ अपक्वानि आम्रफलानि भवन्ति तानि एव ग्रीष्मे पक्वानि मधुराणि च जायन्ते। वसन्ते ऋतौ एतस्मिन् नूतनाः पल्लवाः विलसन्ति। अनन्तरं मञ्जर्यः विराजन्ते। मञ्जरीणां सुगन्धेन सर्वपरिसरः सुगन्धितः भवति। तदा आम्रवृक्षस्य शोभा अवर्णनीया भवति। फलानां भारेण नतं आम्रवृक्षं दृष्ट्वा सर्वे आनन्दन्ति। आम्रवृक्षस्य छाया निबिडा शीतला च भवति। आतपेन तप्ताः जनाः तस्य छायाम् आश्रयन्ते आनन्दिताः च भवन्ति।

**१) एकवाक्येन उत्तरत ।** १

आम्रवृक्षः कीदृशः अस्ति ?

**२) प्रातिपदिकं लिखत ।** १

१) एतस्य - ...............

२) पर्णानाम् - ...............

**३) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत ।** १

आम्रवृक्षः अतीव लघुः ।

**४) माध्यमभाषया सरलार्थं लिखत ।** १

न केवलं तस्य पक्वानि फलानि अस्मभ्यं रोचन्ते अपि तु अपक्वानि अपि ।

**५) गद्यांशात् लट् - क्रियापदानि चित्वा लिखत ।** १

**६) कारकपरिचयं कुरुत ।** १

मञ्जरीणां <u>सुगन्धेन</u> सर्वपरिसरः आनन्दितः भवति।

**प्र.६ आ) - १) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

अलङ्कारप्रियो विष्णुः, जलधाराप्रियः शिवः।
नमस्कारप्रियो भानुः, बालको भोजनप्रियः।।

**क)** **एकवाक्येन उत्तरत। (२ तः १)** १

(१) कः अलङ्कारप्रियः?

(२) कः नमस्कारप्रियः?

**ख)** **समानार्थकशब्दान् लिखत ।** १

भानुः - ...............

**प्र.६** **आ) - २) जालचित्रं पूरयत ।** २




**शुभं भवतु** 👍